ಕರ್ನಾಟಕಸರ್ಕಾರ

ಶಾಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ಸಾಕ್ಷರತಾ ಇಲಾಖೆ

ಪಾಠ ಆಧಾರಿತ ಮೌಲ್ಯಾಂಕನ ಸಾಮಗ್ರಿ

2025-26

ತೃತೀಯ ಭಾಷೆ – ಸಂಸ್ಕೃತ

10

ಹತ್ತನೆಯ ತರಗತಿ

ರಾಜ್ಯ ಶಿಕ್ಷಣ ಸಂಶೋಧನೆ ಮತ್ತು ತರಬೇತಿ ಇಲಾಖೆ
ಬನಶಂಕರಿ 3 ನೇ ಹಂತ, ಬೆಂಗಳೂರು – 560085.
ಮತ್ತು

ಜಿಲ್ಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ತರಬೇತಿ ಸಂಸ್ಥೆ
ಬೆಂಗಳೂರು ನಗರ ಜಿಲ್ಲೆ,ರಾಜರಾಜೇಶ್ವರಿ ನಗರ– 560098

ಪರಿಕಲ್ಪನೆ ಮತ್ತು ಮಾರ್ಗದರ್ಶನ	
ಶ್ರೀಮತಿ ರಶ್ಮಿ ಮಹೇಶ್ V, ಭಾ.ಆ.ಸೇ ಸರ್ಕಾರದ ಪ್ರಧಾನ ಕಾರ್ಯದರ್ಶಿಗಳು ಶಾಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ಸಾಕ್ಷರತಾ ಇಲಾಖೆ	
ಡಾ. ತ್ರಿಲೋಕ್ ಚಂದ್ರ K V, ಭಾ.ಆ.ಸೇ ಆಯುಕ್ತರು, ಶಾಲಾ ಶಿಕ್ಷಣ ಇಲಾಖೆ ಬೆಂಗಳೂರು.	ಶ್ರೀ ಗೋಪಾಲಕೃಷ್ಣ H N, ನಿರ್ದೇಶಕರು DSERT, ಬೆಂಗಳೂರು.
ಡಯಟ್ ಸಹಕಾರ	
ಶ್ರೀ ಶಿವಪ್ಪ ಪ್ರಾಂಶುಪಾಲರು ಮತ್ತು ಉಪನಿರ್ದೇಶಕರು (ಅಭಿವೃದ್ಧಿ) ಜಿಲ್ಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ತರಬೇತಿ ಸಂಸ್ಥೆ, ಬೆಂಗಳೂರು ನಗರ ಜಿಲ್ಲೆ, ರಾಜರಾಜೇಶ್ವರಿನಗರ, ಬೆಂಗಳೂರು–560098	ಶ್ರೀ ಕೆ. ರಾಘವ ಹೊಳ್ಳ ಉಪನ್ಯಾಸಕರು ಜಿಲ್ಲಾ ಶಿಕ್ಷಣ ಮತ್ತು ತರಬೇತಿ ಸಂಸ್ಥೆ, ಬೆಂಗಳೂರು ನಗರ ಜಿಲ್ಲೆ, ರಾಜರಾಜೇಶ್ವರಿನಗರ, ಬೆಂಗಳೂರು–560098
ಸಂಯೋಜನೆ	
ಶ್ರೀಮತಿ ರಾಧಾ P ಹಿರಿಯ ಸಹಾಯಕ ನಿರ್ದೇಶಕರು, DSERT, ಬೆಂಗಳೂರು	
ಮಾರ್ಗದರ್ಶಕರು ಹಾಗೂ ಪರಿಶೀಲನೆ	
ಡಾ. ವೆಂಕಟರಮಣ ದೇವರು ಭಟ್ಟ ಸಂಸ್ಕೃತ ವಿಷಯ ಪರಿವೀಕ್ಷಕರು, ಆಯುಕ್ತರ ಕಾರ್ಯಾಲಯ ಬೆಂಗಳೂರು–01	
ಪಾಠ ಆಧಾರಿತ ಮೌಲ್ಯಾಂಕನ ಸಾಮಗ್ರಿ ರಚನಾ ತಂಡ	
ದೇವರು ಭಟ್ ಕ್ಯಾದಗಿ ಆರ್ ವಿ ಬಾಲಕಿಯರ ಪ್ರೌಢಶಾಲೆ, ಜಯನಗರ ಬೆಂಗಳೂರು–11, ಬೆಂಗಳೂರು 9448509956	ಡಾ॥ ಕವಿತಾ ಭಟ್ಟ ಕೊಂಗಾಡಿಯಪ್ಪ ಪ್ರೌಢಶಾಲೆ, ದೊಡ್ಡಬಳ್ಳಾಪುರ, ಬೆಂಗಳೂರು ಗ್ರಾಮಾಂತರ 8660268928
ಗುರುಮೂರ್ತಿ ಅನಾಥ ಸೇವಾಶ್ರಮ ಪಿ.ಯು.ಕಾಲೇಜ್, ಮಲ್ಲಾಡಿಹಳ್ಳಿ ಚಿತ್ರದುರ್ಗ 9481041090	ಗಣಪತಿ ಸರ್ಕಾರಿ ಪ್ರೌಢಶಾಲೆ ಲಂಬಾಪುರ, ಸಿದ್ದಾಪುರ (ಉ.ಕ) 9481821154
ವೆಂಕಟರಮಣ ಕೆರೆಗದ್ದೆ ಬಾಬು ರಾಜೇಂದ್ರಪ್ರಸಾದ ಪ್ರೌಢಶಾಲೆ, ಮೂಡಬಿದ್ರಿ 9480055778	ಲಕ್ಷ್ಮೀನಾರಾಯಣ ಭಟ್ ಮಹಾರಾಜ ಸರ್ಕಾರಿ ಪ್ರೌಢಶಾಲೆ, ಜೆ.ಎಲ್.ಬಿ ರಸ್ತೆ.ಮೈಸೂರು 9449621165.

अनुक्रमणिका

भागः –2			पृष्ठ सङ्ख्या	उत्तरस्य पृष्ठ सङ्ख्या
13.	पत्रलेखनम्	व्यावहारिक-वैय्यक्तिकपत्रयोः नियमान् लेखनकौशलञ्च ज्ञात्वा लेखनकौशलं प्राप्नुवन्ति ।	55	90
14.	उभयभारती	दीर्घोत्तरकौशलं प्राप्नुवन्ति। पठनकौशलं प्राप्य विषयज्ञानं प्राप्नुवन्ति ।	43	89
15.	सूक्तिपीयूषम्	संस्कृतसाहित्यसुभाषितज्ञानं प्राप्य व्यक्तित्वविकसनं प्राप्नुवन्ति । पदच्छेदपूर्वक अन्वयज्ञानं प्राप्य तात्पर्यं लिखन्ति ।	37	77
16.	यदुगिरिः	तीर्थक्षेत्राणां प्रवासिक्षेत्राणां ऐतिहासिकक्षेत्राणाञ्च महत्त्वम् अवगच्छन्ति । तेषां स्थलानां गमनेन तत्रत्य-विद्यमानं शक्तिम् अनुभवन्ति ।	39	78
17.	अनुवादः-५-८	अनुवादकौशलं प्राप्य संस्कृतसरलवाक्यानि स्वभाषया अनुवदन्ति ।	36	75
18.	मुद्राङ्गुलीयकम्	रामायणस्य विशेषताम् अवगच्छन्ति । संस्कृतसाहित्ये चम्पूकाव्यस्य महत्वं लक्षणज्ञानं च प्राप्नुवन्ति । चम्पूकाव्यस्य पठनक्रम,अन्वयज्ञानम् च प्राप्नुवन्ति ।	43	81
19.	सनातनी नो बध्नाति	आधुनिकसंस्कृतगीतसाहित्यम् अवगच्छन्ति । नवीनकवीनां परिचयः भवति । भारतस्य विशेषताम् अवगच्छन्ति । सर्वत्र भेदाः सत्सु अपि अस्माकं सनातनी एका एव इति जानन्ति ।	46	83
20.	प्रबन्धः	स्वजीवने परिसरे च सम्भावितानुभवान् स्वलेखनमुखेन प्रकटयन्ति । श्रुतं / लिखितं / विचारान् स्वशैल्या लिखितरूपेण प्रकटयन्ति । वाक्यकौशलज्ञानं प्राप्नुवन्ति ।	56	94
21.	छन्दः	छन्दसः लक्षणं ज्ञात्वा लघु-गुरु-गणज्ञानं प्राप्य छन्दसः भेदान् अवगच्छन्ति ।	48	84
22.	दाने सर्वं प्रतिष्ठितम्	संस्कृतसाहित्यसुभाषितज्ञानं प्राप्य व्यक्तित्वविकसनं प्राप्नुवन्ति । पदच्छेदपूर्वक अन्वयज्ञानं प्राप्य तात्पर्य लिखन्ति ।	50	87
23.	तद्धितान्तः	पठितगद्य पद्य कथानां मौल्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति। वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं । सम्भाषणे रुच्युत्पादनञ्च ।	52	88
24.	विक्रमः भेताळश्च	पठितगद्य पद्य कथानां मौल्यं ज्ञात्वा स्वाभिप्रायप्रकटनं कुर्वन्ति । वर्तमानादिकालेषु वाक्यप्रयोगज्ञानं प्राप्नुवन्ति । संबद्धविविधविषयाणां ज्ञानं सम्भाषणद्वारा अधिगमः । अभिप्रायप्रकटनं । सम्भाषणे रुच्युत्पादनञ्च ।	54	90

प्रणतिः

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का
1	बहुविकल्पः	19	-
2	चतुर्थपदम्	6	-
3	ए वा	15	-
4	द्वित्रैः	5	-
5	पद्य	5	-
6	आहत्य	50	-

स्तरः	प्रश्नाः	अङ्का
सुलभः	29	-
साधारणः	20	-
कठिनः	16	-
आहत्य	65	-

I. समुचितम् उत्तरम् चित्वा लिखत ।

1. निशा इत्यस्य विरुद्धार्थकं पदम् इदं भवति । (स्म – सु)

A) दिवा **B)** रात्रिः **C)** यामिनि **D)** रजनी

2. तमः इत्यस्य विरुद्धार्थकं पदम् इदं भवति ।

A) अंधकारः **B)** रात्रिः **C)** दमः **D)** प्रकाशः

3. दिवा इत्यस्य विरुद्धार्थकं पदम् इदं भवति ।

A) प्रभातः **B)**रात्रिः **C)** मध्याह्नः **D)** अपराह्नः

4. कृतघ्नः इत्यस्य विरुद्धार्थकं पदम् इदं भवति ।

A) कृतार्थः **B)** जिज्ञासुः **C)** कृतज्ञः **D)** कृपणः

5. विघ्नः इत्यस्य विरुद्धार्थकं पदम् इदं भवति ।

A) मग्नः **B)** लग्नः **C)** अविग्नः **D)** रुग्णः

6. शत्रुः इत्यस्य विरुद्धार्थकं पदम् इदं भवति ।

A) मित्रम् **B)** अरिः **C)** वैरी **D)** अहितः

7. महाबलः इत्यस्य विरुद्धार्थकं पदम् इदं भवति ।

A) अतिबलः **B)** अमितबलः **C)** क्षीणबलः **D)** बलिष्ठः

8. इन्दु **:** इत्यस्य पर्यायपदम् इदं भवति ।

A) सूर्यः **B)** चन्द्रः **C)** रविः **D)** बुधः

9. महाबलः इत्यस्य पर्यायपदम् इदं भवति ।

A) सूर्यः **B)** षण्मुखः **C)** देवेन्द्रः **D)** शिवः

10. पंकजम् इत्यस्य पर्यायपदम् इदं भवति ।

A) भुवनम् **B)** गगनम् **C)** कमलम् **D)** वाहनम्

11. हिमः इत्यस्य पर्यायपदम् इदं भवति ।

A) जलम् **B)** वह्निः **C)** वायुः **D)** तुषारः

12. शरदा इत्यस्य पर्यायपदम् इदं भवति ।

A) सरस्वती **B)** लक्ष्मी **C)** शचीदेवि **D)** भारती

13. वदनम् इत्यस्य पर्यायपदम् इदं भवति ।

A) पादम् **B)** आस्यम् **C)** नयनम् **D)** मुखम्

14. वदनाम्बुजे अत्र अयं संधिः भवति ।

A) गुणसंधिः **B)** वृद्धिसंधिः **C)** सवर्णदीर्घसंधिः **D)** यण् संधिः

15. खण्डेन्दुः अत्र अयं संधिः भवति ।

A) गुणसंधिः **B)** वृद्धिसंधिः **C)** सवर्णदीर्घसंधिः **D)** यण् संधिः

16. नमो ऽ स्तु अत्र अयं संधिः भवति ।

A पूर्वरूप सन्धिः **B)** वृद्धिसंधिः **C)** सवर्णदीर्घसंधिः **D)** यण् संधिः

17. सर्वदास्माकं अत्र अयं संधिः भवति ।

A) गुणसंधिः **B)** अनुनासिक सन्धिः **C)** सवर्णदीर्घसंधिः **D)** यण् संधिः

18. शरदाम्बोजवदना अत्र अयं संधिः भवति ।

A) जश्त्वसंधिः **B)** वृद्धिसंधिः **C)** सवर्णदीर्घसंधिः **D)** यण् संधिः

19. वदनाम्बुजे अत्र अयं संधिः भवति ।

A) गुणसंधिः **B)** श्चुत्वसंधिः **C)** सवर्णदीर्घसंधिः **D)** यण् संधिः

II. चतुर्थ पदं लिखत । (स्म – सु)

20. खण्डेन्दुकृतशेखरः – ढुण्ढिराजः :: निशामणिशिरोमणिः ----------।
21. सर्वदा – शरदा :: गुरुः --------।
22. खण्डेन्दुकृतशेखरः – ढुण्ढिराजः :: हिमघ्न : ----------
23. शत्रुघ्नः – सूर्यः :: कपाली -------।
24. सर्वलोकानां – गुरुः :: भवरोगिणां -------।
25.भवरोगिणां – भिषक् :: सर्वविद्यानां -------।

III. एकवाक्येन उत्तरं लिखत । (धा – सा)

26. ढुण्ढिराजः कः ?

27. सर्वदा अस्माकं वदने का वसेत् ।

28. सर्वविद्यानां निधिः कः ?

29. दक्षिणामूर्तिः केषां भिषक् ?

30. तमोघ्नः कः ?

31. सूर्यः केषां पतिः ?

32. लोकपाली कः ?

33. महाबलः केषां चिंतमणिः ?

34. कुण्डलीकृतनागेन्द्रः कः ?

35. खण्डेन्दुकृतशेखरः कः ?

36. भवरोगिणां भिषक् कः ?

37. हिमघ्नः कः ?

38. ज्योतिषां पतिः कः ?

39. कपाली कः ?

40. निशामणि शिरोमणिः कः ?

IV. द्वित्रैः वाक्यैः उत्तरं लिखत । (धा – क)

41. गणेशः कीदृशः ?

42. दक्षिणामूर्तिं वर्णयत ।

43. शारदा कीदृशी ?

44. कीदृशः महाबलः वः पातु ?

45. ज्योतिषां पतिः कीदृशः अस्ति ?

V. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत । (धा सा/क)

46. कुण्डलीकृतनागेन्द्र ------ नमोस्तुते ॥

47. शारदा -------- क्रियात ॥ (2024 March)

48. गुरवे ------ नमः ॥ (2023 March)

49. तमोघ्नाय ----- नमः ॥

50. चिन्तामणिः ------ महाबलः ॥

अपूर्वमेला

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	33	16	3	3	55
अङ्का	33	18	9	3	63

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का
1	वस्तुनिष्टः	40	40
2	अतिलघूत्तरम्	11	11
3	लघूत्तरम्	2	4
4	दीर्धोत्तरम्	2	8

स्तरः	प्रश्नाः	अङ्का
सुलभः	27	30
साधारणः	22	25
कठिनः	6	8
आहत्य	55	63

I सूक्तोत्तरचयनप्रस्नाः | (स्म –सु)

1'सन्तोषः अस्य विरुद्धार्थकपदम् इदं भवति ।

A) दुःखः **B)** तोषः **C)** मोदः **D)** एकैकः

2'दिनम् 'अस्य विरुद्धार्थकपदम् इदं भवति ।

A) विनूतनम् **B)** रात्रिः **C)** नवनीतम् **D)** प्रमाणम्

3 'इच्छामः' अत्र एषः पुरुषः अस्ति ।

A)अन्यपुरुषः **B)** प्रथमपुरुषः **C)** मध्यमपुरुषः **D)** प्रथमपुरुषः

5'जनाः' अस्य समानार्थकपदम् इदं भवति ।

A) मानवाः **B)** उपवनम् **C)** पर्व **D)** उपायः

6'गायकः' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

A) वाचिका **B)** पिता **C)** गायिका **D)** स्नुशा

7 ‘आसन् **’**अत्र एषः लकारः अस्ति ।

A,लोट् लकारः **B** लृट् लकारः **C)** लट् लकारः **D)** लङ् लकारः

8‘वदतु**’ ’**अत्र एषः लकारः भवति ।

A)लोट् लकारः **B)** लृट् लकारः **C)** लट् लकारः **D)** लङ् लकारः

9 वामनः एतदर्थं विरामम् इच्छति ।

A) परिसरदिनार्थम् **B)** ग्रामोत्सवार्थम् **C)** मनोरञ्जनार्थम् **D)** नामकरणार्थम्

10 एषा मेलायाः आयोजिका संस्था अस्ति ।

A) संस्कृतभारती **B)** विद्याभारती **C)** ज्ञानभारती **D)** अक्षरभारती

11 एषा जनकेन सह पुस्तकमेलां गतवति ।

A) विभा **B)** कला **C)** प्रभा **D)** गीता

12 विश्वसंस्कृतमेला अत्र सम्पन्ना ॥

A) मैसूरुनगरे **B)** मङ्गलूरुनगरे **C)** मद्रास् नगरे **D)** बेङ्गलूरुनगरे

13 इदं विश्वसंस्कृतपुस्तकमेलायां बहुजनाकृष्टं स्थानम् आसीत् ।

A) संस्कृतग्रामः **B)** पुस्तकाः **C)** खाद्यापणः **D**) जल्पनकेन्द्रम्

14 सन्दर्शकाः एवं ग्रन्थान् अक्रीणन् ।

A) सोत्साहम् **B)** कोपेन **C)** दुःखॆन **D)** वेदनया

15 अस्मिन् वत्सरे विश्वसंस्कृतपुस्तकमेला समायोजिता ।

A) २०२१ **B)** २००० **C)** २००१ **D)** २०११

16 विश्वसंस्कृतपुस्तकमेलायां प्रतिसायम् एतादृशाः कार्यक्रमाः आसन् ।

A) निरुत्साह **B)** मनोरञ्जन **C)** भाषण **D)** पठन

17 संस्कृतभाषायाः व्याप्तिः वर्धमाना अस्ति। वाक्ये विद्यमानं कृदन्तपदम् इदम् अस्ति ।

A) अस्ति **B)** वर्धमाना **C)** संस्कृतभाषायाः **D)** व्याप्तिः

18 वयं मेलायाः वैभवं ज्ञातुम् इच्छामः ।अत्र कृदन्तपदम् इदम् अस्ति ।

A) मेलायाः **B)** वैभवं **C)** ज्ञातुम् **D)** इच्छामः

19 प्रभा पुस्तकानि क्रीतवती । अत्र कृदन्तपदम् इदम् अस्ति ।

A) वयं **B)** प्रभा **C)** पुस्तकानि **D)** क्रीतवती

20 जनाः भागं ऊढ्वा धन्याः अभवन् ।अत्र कृदन्तपदम् इदम् अस्ति ।

A) अभवन् **B)** धन्याः **C)** जनाः **D** ऊढ्वा

21 संस्कृतसाहित्यस्य उत्सवः आयोजितः ।अत्र कृदन्तपदम् इदम् अस्ति ।

A) आयोजितः **B)** उत्सवः **C)** साहित्यस्य **D)** संस्कृतम्

22 कृपया विरामम् उद्घोषयतु । ।अत्र रेखाङ्कितपदस्य कारकम् इदम् अस्ति ।

A)कर्तृकारकम् **B)**कर्मकारकम् **C)** करणकारकम् **D)** अपादानकारकम्

II एकवाक्येन उत्तरत । (धा- सा/सु)

23 वामनः किमर्थं विरामं इच्छति ?

24. विश्वसंस्कृतमेला कुत्र सम्पन्ना ? (2023 March)

25 मेलायाः आयोजिका संस्था का ? (2024 March)

26. का जनकेन सह पुस्तकमेलां गतवती ?

27. मेलायां सर्वजनाकृष्टं स्थानं किम् ?

III रिक्तस्थानं पूरयत ।(धा- सा)

28. संस्कृतपुस्तकमेलायाः------ विवृणोमि ।

29. सन्दर्शकाः----- ग्रन्थान् अक्रीणन् ।

30. -----तमे वत्सरे महान् कार्यक्रमः समायोजितः ।

31. अस्मिन् उत्सवे -----जनाः भागं अवहन् ।

32. प्रतिसायं ------कार्यक्रमाः आसन् ।

IV. विरुद्धपदं लिखत ।(स्म/धा-सा)

33. एकः **34.** नूतनम् । **35**. सानन्दम् **।** **36.** आदरः

V. पर्यायपदं लिखत ।(स्म/धा-सा)

37. उत्सवः

38. जनकः

39. सन्तोषः

40. पर्यटकः

VI. सन्धिं विभज्य नाम लिखत ॥(धा- क)

41. ग्रामोत्सवः

42. लोकार्पणम्

43. खल्वार्य

44. पत्रालयः

VII. विग्रहवाक्यं विलिख्य समासनाम लिखत ॥(धा- क)

45. पुस्तकमेला ---

46. महोत्सवः---

47. संस्कृतग्रामः ---

48. करताडनम् ---

VIII द्वित्रैः वाक्यैः उत्तरं लिखत ।(धा- क)

49. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

50. पुस्तकमेलायाः वेदिकायां के कार्यक्रमाः अभवन् ?

IX कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।(अ-सा)

51. संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत । (2023 March)

52. विश्वसंस्कृतपुस्तकमेलायाः वैभवं वर्णयत ।

X. वाक्यं रचयत । (स्म- सा)

53. अनुमतिः - अद्य विरामं दातुं अनुमतिः नास्ति ।

54. व्यथा - दुष्कार्येण अस्माकं व्यथा एव भवति ।

55. महामेला - संस्कृतपुस्तकमेलामहामेला आसीत् ।

****

सन्धिः

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का
1	बहुविकल्पः	13	-
2	चतुर्थपदम्	6	-
3	ए वा	3	-
4	द्वित्रैः	4	-
5	समूहेतर	7	-
6	आहत्य	33	-

स्तरः	प्रश्नाः	अङ्का
सुलभः	14	-
साधारणः	15	-
कठिनः	8	-
आहत्य	37	-

I. समुचितम् उत्तरम् चित्वा लिखत । (स्म-सु)

1. नन्दनः **+** हसति अत्र सन्धिरूपम् एवम् भवति ।

A) नन्दनो हसति **B)** नन्दन हसति **C)** नन्दनः हसति **D)** नन्दनं हसति

2.मयूरः **+** नृत्यति अत्र सन्धिरूपम् एवम् भवति ।

A) मयूरी नृत्यति **B)** मयूरो नृत्यति **C)** मयूरं नृत्यति **D)** मयूरेण नृत्यति

3. मैत्रेयः **+** इच्छति अत्र विसर्गस्य एषः आदेशः भवति ।

A) रकारः **B)** उकारः **C)** सकारः **D)** लोपः

4. मुनिः **+** नमति अत्र विसर्गस्य एषः आदेशः भवति ।

A) रकारः **B)** उकारः **C)** सकारः **D)** लोपः

5. गुरुर्देवः अत्र विसर्गस्य एषः आदेशः भवति ।

A) रकारः **B)**उकारः **C)** सकारः **D)** लोपः

6. गुरुस्साक्षात् अत्र विसर्गस्य एषः आदेशः भवति ।

A) रकारः **B)** उकारः **C)** सकारः **D)** लोपः

7. देवा एव अत्र विसर्गस्य एषः आदेशः भवति ।

A) रकारः **B)** उकारः **C)** सकारः **D)** लोपः

8. ज्योतिर्गमय अत्र विसर्गस्य एषः आदेशः भवति ।

A) रकारः **B)** उकारः **C)** सकारः **D)** लोपः

9. सेवक इति अत्र अयं सन्धिः भवति ।

A) सवर्णदीर्घः **B)** गुणः **C)** वृद्धिः **D)** विसर्गः

10.बालो गच्छति अत्र अयं सन्धिः भवति ।

A) सवर्णदीर्घः **B)** गुणः **C)** वृद्धिः **D)** विसर्गः

11. बालस्तत्र अत्र सन्धि विभजनम् एवं भवति ।

A) बालः तत्र **B)** बाल तत्र **C)** बालो तत्र **D)** बालस् तत्र

12. गजः**+**तत्र अत्र सन्धिरूपम् एवं भवति ।

A) गजो तत्र **B)** गज तत्र **C)** गजस्तत्र **D)** गज तत्र **)**

13. विद्यालयः अत्र अयं सन्धिः भवति ।

A) सवर्णदीर्घः **B)** गुणः **C)** वृद्धिः **D)** विसर्गः **)**

II. चतुर्थपदं लिखत । (स्म/धा-सा)

14. रामेति - गुणसन्धिः :: रामस्तत्र -----------।

15. मुराररिपि – विसर्गस्य रेफः :: सुरा नम्याः --------।

16. तत्रापि – सवर्णदीर्घसन्धिः :: देव इति -------।

17. सन्धिप्रकाराः – त्रयः :: विसर्गविकाराः --------- ।

18. देवालयः – सवर्णदीर्घःसन्धिः :: हरिरेव -------।

19. सूर्योदयः – गुणसन्धिः :: मुनिस्सः ------।

III. समूहेतरपदं लिखत । (धा-सा)

20. गजस्तत्र , पुनरपि , देव इति , तदपि ।

21. तच्च , सद्गुणाः , तन्मयः, गुरुरपि

22. मृत्योर्मा , देवैरपि , मुरारिः , गुरुर्देवः

23. सकारादेशः , वकारादेशः , रकारादेशः, उकारादेशः ।

24. एकैकं , गणेशः , इत्यादि, तैर्न ।

25. गुरुर्ब्रह्मा , विप्रोसौ , बाला अपि , शुभोदयः ।

26. गजो गच्छति , रामो विग्रहवान् , विप्रोऽ सौ विद्वज्जनः ।

IV. एकवाक्येन उत्तरं लिखत । (धा- सा)

27. सन्धिः नाम कः ?

28. सन्धिषु कतिप्रकाराः सन्ति ?

29. विसर्गस्य कति आदेशाः भवन्ति ?

V. द्वित्रैः वाक्यैः उत्तरं लिखत । (अ – क)

30. विसर्गस्य सकारादेशः कदा भवति ?

31. विसर्गस्य रेफादेशः कदा भवति ?

32. विसर्गस्य उकारादेशः कदा भवति ?

33. विसर्गस्य लोपः कदा भवति ?

****

मिथ्याभिमानः

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	25	16	7	00	48
अङ्का	33	18	12	00	66

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का
1	वस्तुनिष्टः	13	13
2	अतिलघूत्तरम्	26	26
3	लघूत्तरम्	2	4
4	दीर्घोत्तरम्	07	23

स्तरः	प्रश्नाः	अङ्का
सुलभः	27	30
साधारणः	22	25
कठिनः	6	11
आहत्य	55	66

I.सूक्तं उत्तरं चित्वा लिखत | (स्म – सु)

1."हाहाकारः**"** इत्यस्य अयं अर्थः वर्तते।

A) कोलाहलः **B)** मधुरस्वरः **C)** शब्दशून्यः **D)** कर्कशशब्दः

2."विश्वासः**"** अस्य इदं विरुद्धपदं भवति।

A) आत्मविश्वासः **B)** अविश्वासः **C)** निःश्वासः **D)** परश्वः

3."पुत्रः**"** अस्य अन्यलिङ्गपदं एवं अस्ति।

A) पुत्रा **B)** सुता **C)** पुत्री **D)** पुत्रिणी

4."श्रुत्वा**"** अस्य एषः प्रत्ययः भवति।

A) तुमुन् प्रत्ययः **B)** ल्यप् प्रत्ययः **C)** क्त्वा प्रत्ययः **D)** तिङ् प्रत्ययः।

5."भवतः रथे सारथिः अहं**"** अत्र रेखाङ्कितपदं इदं कारकम् भवति।

A) अपादानकारकम् **B)** कर्तृकारकम् **C)** करणकारकम् **D)** अधिकरणकारकम्।

6."अकथयत्**"** एषः लकारः उच्यते।

A) लट् लकारः **B)** लृट् लकारः **C)** लङ् लकारः **D)** लोट् लकारः

7."श्रुणु**"** एषः पुरुषः भवति।

A) प्रथमपुरुषः **B)** मध्यमपुरुषः **C)** उत्तमपुरुषः **D)** अन्यपुरुषः

8."युद्धकाले**"** अत्र इयं विभक्तिः भवति।

A) सप्तमी **B)** द्वितीया **C)** तृतीया **D)** षष्ठी।

II. एकवाक्येन उत्तरत । (स्म – सु)

9. केषां मध्ये भीषणं युद्धं प्रचलति स्म ?

10.अर्जुनस्य बाणप्रहारेण कर्णस्य रथः कियत् दूरं प्रतिसरति स्म ?

11.कृष्णः कर्णं कैः अभिनन्दति स्म ? (2023 March)

12. कर्णार्जुनयोः कीदृशं युद्धं प्रवृत्तम् ?

13.अर्जुनः अन्ते किं ज्ञातवान् ?

14. कुत्र कौरवपाण्डवानां मध्ये भीषणं युद्धं प्रचलति स्म ?

15. कयोः भीषणं युद्धं प्रवृत्तम् ? (2024 March)

16. युद्धसमये अर्जुनस्य सारथिः कः आसीत् ?

17. कौन्तेयः कः?

18. रथस्य पताकायां कः विराजते ?

III. रिक्तस्थानं पूरयत । (धा – सा)

19. उभयोः .... दृष्ट्वा सर्वे आश्चर्यचकिताः ।

20. हे कौन्तेय .... श्रृणु ।

21.कृष्णेन अर्जुनस्य...खण्डितः ।

22.अर्जुनस्य रथः .... प्रतिसरति स्म ।

23. अर्जुनस्य सारथिः .... आसीत् ।

IV. पर्यायपदं लिखत । (स्म/धा-सु/सा)

24. मधुसूदनः **25.** कौन्तेयः **26.** साधुवादः **27**. हनूमान् **28.** सारथिः **29**. युद्धः **30.**वीरः **31.** वारं वारं

V.विरुद्धपदं लिखत ।

32. पृष्ठतः **33**. दूरं **34.** अभिमानः **35.** कोप **36.** साधु **37.** एकः **38**. यथार्थं **39.** मिथ्या

VI. यथानिर्देशम् उत्तरं लिखत ।(धा-सु/सा)

40.'भवतः का गतिः भवेत् । (2023 March)

कः पाठः ? कः अवदत् ? कम् अवदत् ?

41.'भवान् कर्णाय साधुवादं यच्छति ।'(2024 March)

कः पाठः ? कः अवदत् ? कम् अवदत् ?

42. "हे कौन्तेय ! ध्यानपूर्वकं श्रृणु ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

43. "अहं हनूमान् च भवतः रथात् अधः अवतरावः" ।

कः पाठः ? "अहं" इत्यनेन कः उच्यते ? "भवतः" इति पदेन कः स्वीक्रियते ?

44. "साधु कर्ण साधु"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

VII. द्वित्रैः वाक्यैः उत्तरं लिखत । (अ – क)

45 अर्जुनः कृष्णं किम् अपृच्छत् ?

46.कर्णार्जुनयोः युद्धं कथम् आसीत् ?

VIII. कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।(अ – क)

47. कृष्णेन अर्जुनस्य मिथ्याभिमानः कथं खण्डितः ? (2022March)

48.कृष्णः अर्जुनं कथं समाधत्ते इति विवृणुत ।

****

कृदन्तम्

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	21	08	0	0	29
अङ्का	21	08	0	0	29

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का
1	वस्तुनिष्टः	21	21
2	अतिलघूत्तरम्	08	08
3	लघूत्तरम्	00	00
4	दीर्धोत्तरम्	00	00

स्तरः	प्रश्नाः	अङ्का
सुलभः	21	21
साधारणः	04	04
कठिनः	04	04
आहत्य	29	29

I.सूक्तं उत्तरं चित्वा लिखत | (स्म – सु)

1.अहम् पत्रं लिखन् अस्मि | अत्र कृदन्तपदम् इदं भवति |

A)अहम् **B)** पत्रम् **C)** लिखन् **D)** अस्मि

2.'देवी देवालये विराजमाना अस्ति'| अत्र कृदन्तपदम् इदं भवति|

A) देवी **B)** देवालये **C)** विराजमाना **D)** अस्ति

3.बालकेन पाठः पठितव्यःभवति| अत्र कृदन्तपदम् इदं भवति|

A) बालकेन **B)** पाठः **C)** पठितव्यः **D)** भवति|

4.अर्जुनः कर्णं दृष्ट्वा शिबिरं प्राविशत्| अत्र कृदन्तपदम् इदं भवति|

A) अर्जुनः **B)** कर्णं **C)** दृष्ट्वा **D)** शिबिरं

5.कृष्णः कालिङ्गसर्पात् जनान् रक्षितवान्| अत्र कृदन्तपदम् इदं भवति|

A) कृष्णः **B)**कालिङ्गसर्पात् **C)**जनान् **D)**रक्षितवान्

6.रजनी विज्ञानं ज्ञातुम् इच्छति| अत्र कृदन्तपदम् इदं भवति|

A) रजनी **B)**विज्ञानं **C)**ज्ञातुम् **D)**इच्छति|

7. शिवेन अयं लोकः रक्षितः| अत्र कृदन्तपदम् इदं भवति|

A) शिवेन **B)**अयं **C)**लोकः **D)**रक्षितः|

8.प्रणम्य शिरसा देवं गौरीपुत्रम्| अत्र कृदन्तपदम् इदं भवति|

A) प्रणम्य **B)**शिरसा **C)**देवं **D)**गौरीपुत्रम्|

9. कृत्वा**,**गत्वा**,**विमृश्य**,** नत्वा –अत्र समूहेतरं पदं इदं भवति|

A) कृत्वा**,** **B)**गत्वा**,** **C)**विमृश्य**,** **D)**नत्वा

10.आनीतवान्**,**कृतवती**,**दत्तवान्**,**ज्ञातवान्- अत्र समूहेतरं पदं इदं भवति|

A) आनीतवान्**,** **B)**कृतवती**,** **C)**दत्तवान्**,** **D)**ज्ञातवान्

11.पठनीयः**,**ताडनीयः**,**करणीया**,**वध्यः**-** अत्र समूहेतरं पदं इदं भवति|

A) पठनीयः**,** **B)**ताडनीयः**,** **C)**करणीया**,** **D)**वध्यः

12. गच्छन्**,**हसन्**,**पठन्**,**ज्ञातुम्**-** अत्र समूहेतरं पदं इदं भवति|

A) गच्छन्**,** **B)**हसन्**,** **C)**पठन्**,** **D)**ज्ञातुम्

13.'गतवती' अत्र एषः प्रत्ययः भवति|

A)क्त प्रत्ययः **B)**क्त्वा प्रत्ययः **C)**क्तवतु प्रत्ययः **D)**ल्यप् प्रत्ययः

14. 'पठन्' अत्र एषः प्रत्ययः भवति|

A) क्त प्रत्ययः **B)**शतृ प्रत्ययः **C)**क्तवतु प्रत्ययः **D)**ल्यप् प्रत्ययः

15. 'वन्दितः' अत्र एषः प्रत्ययः भवति|

A) क्त प्रत्ययः **B)**शतृ प्रत्ययः **C)**क्तवतु प्रत्ययः **D)**ल्यप् प्रत्ययः

16. 'शोभमानम्'अत्र एषः प्रत्ययः भवति|

A) क्त प्रत्ययः **B)**शतृ प्रत्ययः **C)**शानच् प्रत्ययः **D)**ल्यप् प्रत्ययः

17.'लेखितुम्' अत्र एषः प्रत्ययः भवति|

A) क्त प्रत्ययः **B)**शतृ प्रत्ययः **C)**शानच् प्रत्ययः **D)**तुमुन् प्रत्ययः

18.'बोधनीयम्' अत्र एषः प्रत्ययः भवति|

A) अनीयर् प्रत्ययः **B)**शतृ प्रत्ययः **C)**शानच् प्रत्ययः **D)**तुमुन् प्रत्ययः

19.'लिखित्वा' अत्र एषः प्रत्ययः भवति|

A)तव्यत् प्रत्ययः **B)**क्त्वा प्रत्ययः **C)**ल्यप् प्रत्ययः **D)**तुमुन् प्रत्ययः

20.'श्रुत्वा' अत्र एषः प्रत्ययः भवति|

A) तव्यत् प्रत्ययः **B)**क्त्वा प्रत्ययः **C)**ल्यप् प्रत्ययः **D)**तुमुन् प्रत्ययः

21.'विलिख्य' अत्र एषः प्रत्ययः भवति|

A) तव्यत् प्रत्ययः **B)**क्त्वा प्रत्ययः **C)**ल्यप् प्रत्ययः **D)**तुमुन् प्रत्ययः

II.एकवाक्येन उत्तरं लिखत| (धा – सा)

22.कृदन्तं नाम किम्?

23.कृदन्तं कथम् उत्पद्यते?

24.कृदन्तं किम् भवति?

25.कृदन्तनामपदानां रूपाणि कति लिङ्गेषु विभक्तानि?

26.शतृप्रत्ययान्तं कृदन्तं कथं भवति?

27.केभ्यः धातुभ्यः शानच् प्रत्ययः भवति?

28.क्त्वा प्रत्ययः कदा भवति?

29.क्त्वा प्रत्ययस्य स्थाने ल्यप् आदेशः कदा भवति?

****

जीवनयोगः

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	22	24	12	-	58
अङ्का	24	26	24	-	74

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का	
1	वस्तुनिष्टः	18	18	
2	अतिलघूत्तरम्	31	31	
3	लघूत्तरम्	2	04	
4	दीर्घोत्तरम्	7	21	

स्तरः	प्रश्नाः	अङ्का
सुलभः	17	19
साधारणः	33	45
कठिनः	08	10
आहत्य	58	74

I सूक्तं उत्तरं चित्वा लिखत | (स्म – सु)

1 ज्ञानं लब्ध्वा परां शान्तिम् अधिगच्छति । अत्र कृदन्तपदम् इदम् अस्ति ।

A) ज्ञानं **B)** लब्ध्वा **C)** शान्तिम् **D)** अधिगच्छति

2 त्वं लोकसंग्रहम् कर्तुम् अर्हसि।।अत्र कृदन्तपदम् इदम् अस्ति ।

A) त्वं **B)** लोकसंग्रहम् **C)** कर्तुम् **D)** अर्हसि

3 पुष्पम् अत्र एतत् लिङ्गम् अस्ति |

A) एकवचनम् **B)** द्विवचनम् **C)** बहुवचनम् **D)** वचनान्तरम्

5 कर्मणा इत्यत्र एषा विभक्तिः अस्ति ।

A)चतुर्थी विभक्तिः **B)** प्रथमाविभक्तिः **C)** द्वितीयाविभक्तिः **D)**तृतीयाविभक्तिः

II चतुर्थपदम् लिखत | (स्म/धा-सु)

6. ज्ञानी ;पण्डितः ;; पार्थः ;------

7. भगवद्गीतायम् ; कर्मयोगः ;;भीष्मपर्वणि ; -----

8. कुमारसम्भवम् ; कालिदासः;; महाभारतम्; ----

9. लोकपालः ; नारायणः ;; गीताचार्यः ;----

III एकवाक्येन उत्तरं लिखत । (धा-सा)

10. कः महाभारतं रचितवान् ? स्म. सु

11. भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति ?

12. कतिविधाः जनाः देवं भजन्ते ?

13. त्रयः योगाः के ?

14. कः ज्ञानं लभते ?

15. केन सदृशं पवित्रं नास्ति ?

16. के कर्मणैव संसिद्धिम् आस्थिताः ?

17. गीताद्वारा श्रीकष्णः अर्जुनं किं बोधयति ?

18. कुत्र ते अधिकारः ?

IV रिक्तस्थानं पूरयत ॥(स्म/धा-सा)

19 कर्मण्येवाधिकारस्ते -------कदाचन ॥

20. ------हि संसिद्धिमास्थिता जनकादयः ॥

21. पत्र पुष्पं फलं तोयं यो मे -----प्रयच्छति ॥

22. तत्स्वयं योगसंसिद्धः -------विन्दति ॥

23. ज्ञानं लब्ध्वा परां ----अचिरेणाधिगच्छति ॥

V संयोजयत ॥(स्म-सु)

अ	आ
24. वेदव्यासः	पण्डितः ।
25. भगवद्गीता	अर्जुनः ।
26. श्रीकृष्णः	भीष्मपर्वणि ।
27. पार्थः	महाभारतम् ।
28. ज्ञानी	गीताचार्यः ।

VI विरुद्धपदं लिखत ॥(स्म/धा-सा)

29. सुकृतिनः

30. संयतेन्द्रियः

31. अचिरेण

32. सदृशम्

VII पर्यायपदानि लिखत ।(स्म/धा-सा)

33. पुष्पम् **34.** सलिलम्

35. पत्रम् **36**. पवित्रम्

VIII सन्धिं विभज्य नाम लिखत ।(धा-सा)

37. कर्मण्येव **38.** जनकादयः **39**. कर्मणैव

IX विग्रहवाक्यं विलिख्य समासनाम लिखत ।(धा –सा)

40. कर्मफलहेतु **41.** संयतेन्द्रियः **42**. योगसं सिद्धः **43.** लोकसङ्ग्रहम्

X लकार पुरुष-वचनानि लिखत ॥ ((अ-क)

44. भजन्ते -

45. प्रयच्छति-

46. लभते-

47. अर्हसि-

48. गच्छति -

49. विद्यते -

XI द्वित्रैः वाक्यैः उत्तरं लिखत ॥(धा-सा)

50. कति विधाः जनाः देवं भजन्ते ? ते के ?

51. कर्मणः विषये भगवतः अभिप्रायः कः ?

XII कवेः देश-काल-कृतीनां वषये त्रिचतुरैः वाक्यैः उत्तरं लिखत । (धा-सा)

52. कविः- वेदव्यासः ,

XIII पद्यपाठस्य नाम विलिख्य तात्पर्यं लिखत।(अ-क)

53. कर्मण्ये वाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥

54. कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि।।

55. चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । (2023 March)
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।

56. पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥

57. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

58. श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

****

एकाग्रता

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	33	21	6	00	60
अङ्का	33	21	15	00	69

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का
1	वस्तुनिष्टः	38	38
2	अतिलघूत्तरम्	16	16
3	लघूत्तरम्	3	6
4	दीर्घोत्तरम्	3	9

स्तरः	प्रश्नाः	अङ्का
सुलभः	30	30
साधारणः	24	24
कठिनः	6	15
आहत्य	60	69

I. समुचितम् उत्तरम् चित्वा लिखत ।(स्म/धा – सु/सा)

1. ग्रन्थालयः इति शब्दस्य लिंगम् इदं भवति ।

A) पुल्लिंगः **B)** स्त्रीलिंगः **C)** नपुंसकलिंगः **D)** अन्यलिंगः

2. एकाग्रतायाः . इति शब्दस्य लिंगम् इदं भवति ।

A) पुल्लिंगः **B)** स्त्रीलिंगः **C)** नपुंसकलिंगः **D)** अन्यलिंगः

3. पुस्तकेभ्यः इति शब्दस्य लिंगम् इदं भवति ।

A) पुल्लिंगः **B)** स्त्रीलिंगः **C)** नपुंसकलिंगः **D)** अन्यलिंगः

4. प्रश्नान् इति शब्दस्य लिंगम् इदं भवति ।

A) पुल्लिंगः **B)** स्त्रीलिंगः **C)** नपुंसकलिंगः **D)** अन्यलिंगः

5. ग्रन्थालयः इति शब्दस्य वचनम् इदं भवति ।

A) एकवचनम् **B)** द्विवचनम् **C)** बहुवचनम् **D)** अन्यवचनम्

6. एकाग्रतायाः इति शब्दस्य वचनम् इदं भवति ।

A) एकवचनम् **B)** द्विवचनम् **C)** बहुवचनम् **D)** अन्यवचनम्

7.पुस्तकेभ्यः इति शब्दस्य वचनम् इदं भवति ।

A) एकवचनम् **B)** द्विवचनम् **C)** बहुवचनम् **D)** अन्यवचनम्

8. प्रश्नान् इति शब्दस्य वचनम् इदं भवति ।

A) एकवचनम् **B)** द्विवचनम् **C)**बहुवचनम् **D)** अन्यवचनम्

9. ग्रन्थालयः इति शब्दस्य एषा विभक्तिः भवति ।

A) प्रथमा विभक्तिः **B)** द्वितीया विभक्तिः **C)** षष्ठी विभक्तिः **D)** चतुर्थी विभक्तिः

10. एकाग्रतायाः इति शब्दस्य एषा विभक्तिः भवति ।

A) प्रथमा विभक्तिः **B)** द्वितीया विभक्तिः **C)** षष्ठी विभक्तिः **D)** चतुर्थी विभक्तिः

11. पुस्तकेभ्यः इति शब्दस्य एषा विभक्तिः भवति ।

A) प्रथमा विभक्तिः **B)** द्वितीया विभक्तिः **C)** षष्ठी विभक्तिः **D)** चतुर्थी विभक्तिः

12. प्रश्नान् इति शब्दस्य एषा विभक्तिः भवति ।

A) प्रथमा विभक्तिः **B)** द्वितीया विभक्तिः **C)** षष्ठी विभक्तिः **D)** चतुर्थी विभक्तिः

13. प्रेषयति अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)** लोट् **D)** लृट् **)**

14. अपृच्छत् अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)** लोट् **D)** लृट् **)**

15. अयच्छत् अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)** लोट् **D)** लृट् **)**

16.गच्छ अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)** लोट् **D)** लृट्

17. अभवत् अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)** लोट् **D)** लृट्

18. वर्तते अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)** लोट् **D)** लृट्

19.आगच्छति अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)**लोट् **D)** लृट्

20. भवति   अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)**लोट् **D)** लृट्

21. भविष्यति अत्र एषः लकारः अस्ति ।

A) लट् **B)** लङ्**.** **C)** लोट् **D)** लृट्

22. प्रेषयति अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः **B)** मध्यमपुरुषः **C)** उत्तमपुरुषः **D)** अन्यपुरुषः

23.अपृच्छत् अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः **B)** मध्यमपुरुषः **C)** उत्तमपुरुषः **D)** अन्यपुरुषः

24. अयच्छत् अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः **B)** मध्यमपुरुषः **C)** उत्तमपुरुषः **D)** अन्यपुरुषः

25. गच्छ अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः B) मध्यमपुरुषः C) उत्तमपुरुषः D) अन्यपुरुषः

26.वर्तते अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः B) मध्यमपुरुषः C) उत्तमपुरुषः D) अन्यपुरुषः

27. आगच्छति अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः B) मध्यमपुरुषः C) उत्तमपुरुषः D) अन्यपुरुषः

28. भवति अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः B) मध्यमपुरुषः C) उत्तमपुरुषः D) अन्यपुरुषः

29. भविष्यति अत्र एषः पुरुषः अस्ति ।

A) प्रथमपुरुषः B) मध्यमपुरुषः C) उत्तमपुरुषः D) अन्यपुरुषः

30. प्रेषयति अत्र एतत् वचनम् अस्ति । ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

31. अपृच्छत् अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

32. अयच्छत् अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

33. गच्छ अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

34. वर्तते अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

35. आगच्छति अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

36. भविष्यति अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

37. भवति अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

38. अभवत् अत्र एतत् वचनम् अस्ति ।

A) एकवचनम् B) द्विवचनम् C) बहुवचनम् D) अन्यवचनम्

II. विग्रहवाक्यं विलिख्य समास नाम लिखत । (धा-सा)

39. अखण्डानन्दः **40.** पुस्तकालयः **41.** आश्चर्यचकितः **42.** प्रतिदिनम् **43.**असत्यम् **44.** ग्रन्थालयः ।

III.. एकवाक्येन उत्तरं लिखत । (धा-सा)

45. स्वामी विवेकानन्दः कुत्र गतवान् ?

46. विवेकानन्दः स्वशिष्यं कुत्र प्रेषयति स्म ?

47. ग्रन्थपालः काम् दृष्ट्वा आश्चर्यचकितः जातः ?

48. पठनार्थं का आवश्यकी ?

49. विवेकानन्दस्य शिष्यः कः ?

50. स्वामी विवेकानन्दः कीदृशः सन्यासी आसीत् ?

51. विवेकनन्दस्य यशसः कारण किम् आसीत् ?

52. विवेकनन्दाय किम् अतीव रोचते स्म ?

53. अखण्डानन्दः पुस्तकं स्वीकर्तुं कुत्र आगतवान् ?

54. एकाग्रता अस्माकं कार्येषु किं वर्धयति ?

IV. द्वित्रैः वाक्यैः उत्तरं लिखत । ((स्म/धा-सा)

55. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ? (2023 March)

56. एकग्रतायाः विषये विवेकानन्दः किम् अवदत् ?

57. ग्रन्थपालः कोपेन किम् अपृच्छत् ?

V यथानिर्देशं उत्तरं लिखत । (अ-क)

58. " गच्छ अद्य अहं पुस्तकं न दास्यामि " । (2024 March)

कः पाठः ? कः अवदत् ? कम् अवदत् ?

59. "मया एतानि सर्वाणि पुस्तकानि पठितानि " ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?.

60. " एकाग्रता पठनार्थम् आवश्यकी वर्तते " ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

****

समासः

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	07	22	09	-	38
अङ्का	07	22	09	-	

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का	
1	वस्तुनिष्टः	04	04	
2	अतिलघूत्तरम्	34	34	
3	लघूत्तरम्	0	0	
4	दीर्घोत्तरम्	0	0	

स्तरः	प्रश्नाः	अङ्का
सुलभः	07	07
साधारणः	22	22
कठिनः	09	09
आहत्य	38	38

I एकवाक्येन उत्तरत॥ (स्म-सु)

1. समासः नाम कः ?

2. विग्रहवाक्यं नाम किम् ?

3. बहुव्रीहिसमासः कतिविधः ?

4.अव्ययीभावसमासे प्रायः पूर्वपदं किम् भवति ?

II रिक्तस्थानं पूरयत।(स्म/धा-सा)

5. ------प्रधानः बहुव्रीहिः ॥

6. ------प्रधानः अव्ययीभावः ॥

7. पूर्वोत्तरपदानां विभक्तिः समाना चेत् -----बहुव्रीहिः ॥

8. पूर्वोत्तरपदानां विभक्तिः विभिन्ना चेत् ------बहुव्रीहिः॥

III समूहेतरं पदं चित्वा लिखत ((धा-सा)

9. यथाविधि अनुरूपम्, आमुक्तिः, चक्रपाणिः ॥

10. प्राप्तानन्दः, पद्मनाभः, प्रतिदिनम्, शूलपाणिः ॥

11. महाबलः, शूलपाणिः, पद्मनाभः, चन्द्रशेखरः ॥

IV चतुर्थं पदं लिखत ॥ (स्म/धा-सा)

12. उत्तरपदार्थप्रधानः - तत्पुरुषः, अन्यपदार्थप्रधानः - ....॥

13. उभयपदार्थप्रधानः— द्वन्द्वः पूर्वपदार्थप्रधान - ....॥

14. निर्विघ्नम् - अव्ययीभावः ; महाबलः - ....॥

15. चन्द्रशेखरः — बहुव्रीहिः ; ; प्रतिक्षणम् - ....॥

V विग्रहवाक्यं विलिख्य समासनाम लिखत (अ-क)

16. अधीतव्याकरणः-
17. शूलपाणिः-
18. उपवृक्षम् –
19. यथाविधि –
20. प्राप्तानन्दः –
21. प्रतिक्षणम् –

VI समस्तपदानि लिखित्वा समासनाम लिखत ॥ (अ-क)

22 लम्बम् उदरं यस्य सः—

23. दिनं दिनं

24. महत् बलं यस्य सः

25. विघ्नानाम् अभावः

26. चक्रं पाणौ यस्य सः

27. पद्मं नाभौ यस्य सः

28. चन्द्रः शेखरे यस्य सः-

29. मुक्तेःपर्यन्तम्

॥क्रियाकलापः ॥(धा-सा)

30. वृकस्य उदरं इव उदरं यस्य सः ॥ - बहुव्रीहिसमासः ॥

31. प्रकृष्टं बलं यस्य सः ॥ - बहुव्रीहिसमासः ॥

32. जितानि इन्द्रियाणि येन सः ॥ बहुव्रीहिसमासः ॥

33. समानं उदरं यस्य सः - ॥ बहुव्रीहिसमासः ॥

34. त्रीणि लोचनानि यस्य सः - ॥ बहुव्रीहिसमासः ॥

35. निर्गतं धनं यस्मात् सः—॥ बहुव्रीहिसमासः ॥

35. वीरः पुरुषः यस्मिन् सः - ॥ बहुव्रीहिसमासः ॥

37. विशाले अक्षिणी यस्याः सा - ॥ बहुव्रीहिसमासः ॥

38. मूषकः वाहनम् यस्य सः - ॥ बहुव्रीहिसमासः ॥

****

इन्दुः क्षीरनिधाविव

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	12	20	09	-	41
अङ्का	12	23	25	-	60

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का	
1	वस्तुनिष्टः	13	13	
2	अतिलघूत्तरम्	16	16	
3	लघूत्तरम्	05	10	
4	दीर्घोत्तरम्	07	21	

स्तरः	प्रश्नाः	अङ्का
सुलभः	12	12
साधारणः	22	27
कठिनः	07	21
आहत्य	41	60

I.बहुविकल्पोत्तरप्रश्नाः|(स्म-सु)

1.'देहः' अस्य समानार्थकपदम् इदं भवति|

A) अङ्गः **B)** रक्षा **C)** मस्तकः **D)** कायः

2.'इन्दुः' अस्य समानार्थकं पदम् इदं भवति|

A) चन्द्रः **B)** सूर्यः **C)** नक्षत्रम् **D)** आकाशः

3.'रविः' अस्य समानार्थकं पदम् इदं भवति|

A)निशाकरः **B)**दिवाकरः **C)**रत्नाकरः **D)**हितकरः

4.'पुरी' अस्य समानार्थकं पदम् इदं भवति|

A)आहारः **B)**तैलम् **C)**रुचिकरः **D)**नगरी

5.'शैशवः' अस्य समानार्थकं पदम् इदं भवति|

A)वार्धक्यम् **B)**यौवनम् **C)**बाल्यम् **D)**प्रातःकालः

6.'प्रज्ञा' अस्य समानार्थकं पदम् इदं भवति|

A) बुद्धिः **B)** दृष्टिः **C)** देहः **D)** विज्ञानम्

7.'भूत्यर्थम्' अस्य सन्धिविभागः एवं भवति|

A) भू+त्यर्थम् **B)** भूति+अर्थम् **C)** भूत्य+अर्थम् **D)** भूतु+अर्थम्

8.'तनुः' अस्य अस्य समानार्थकं पदम् इदं भवति|

A) पादः **B)** देहः **C)** हस्तः **D)** शिरः

9.'उत्स्रष्टुम्' अत्र एषः प्रत्ययः भवति|

A)क्त्वा **B)** क्त **C)**तुमुन् **D)** ल्यप्

10.'आगत्य' अत्र एषः प्रत्ययः भवति|

A) क्त्वा **B)** क्त **C)** तुमुन् **D)** ल्यप्

II.चतुर्थं पदं लिखत ।(धा-सा)

11.धर्मराजः-चन्द्रवंशीयः :: दिलीपः-____________|

12.सूर्यः-रसम् आदत्ते :: दिलीपः-_____________|

13.भारविः-किरातार्जुनीयम् :: कालिदासः-_______|

III.एकवाक्येन उत्तरं लिखत ।(धा-सा)

14.के शैशवे अभ्यस्तविद्याः आसन्?

15.तनुवाग्विभवः कः?

16.कः इन्दुः क्षीरनिधाविव प्रसूतः?

17.दिलीपः कः इव प्रांशुः आसीत्?

18.दिलीपः भूमिं काम् इव शशास?

19.क्षात्रो धर्म इवाश्रितः कः?

20.कः आरम्भसदृशोदयः आसीत्?

21.वेलावप्रवलया, परिखीकृतसागरा च का?

22.वार्धके मुनिवृत्तयः के?

23.चापलायप्रचोदितः इति कः वदति?

IV.द्वित्रैः वाक्यैः उत्तरं लिखत ।(धा-सा)

24.रघुवंशीयराजाः कथम् आसन्?

25.कीदृशीम् उर्वीं दिलीपः एकपुरीमिव शशास?

26.दिलीपः क्षात्रो धर्म इवाश्रितः कथम्?

27.दिलीपस्य शासनपद्धतिः कथम् आसीत्?

28.कालिदासः रघूणां विषये स्वाभिप्रायं कथं वदति?

V.विग्रहवाक्यं विलिख्य समास नाम लिखत । (अ-क)

29.व्यूढोरस्कः|

30.क्षीरनिधिः|

31.महाभुजः|

32.सदृशारम्भः|

33.राजेन्दुः|

34.वृषस्कन्धः|

VI.कर्णाटकभाषया आङ्ग्लभाषया वा दशभिः वाक्यैः उत्तरं लिखत । (धा/अ-सा/क)

35.दिलीपः कीदृशः राजा आसीत् इति वर्णयत| (2023 March)

36.दिलीपस्य शासनपद्धतिं विवृणुत|

37.रघुवंशीयराजानां लक्षणं विवृणुत|

VII.श्लोकतात्पर्यम् कर्नाटकभाषायां आङ्ग्लभाषायां संस्कृतभाषायां वा विवृणुत ।(अ-क)

38.शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्|
वार्धकेमुनिवृत्तीनाम् योगेनान्ते तनुत्यजाम्||

39.आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः|
आगमैः सदृशारम्भः आरम्भसदृशोदयः|

40.प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्|
सहस्रगुणमुत्स्रष्टुम् आदत्ते हि रसं रविः||

41.स वेला वप्रवलयां परिखीकृतसागराम्|
अनन्यशासनाम् उर्वीम् शशासैकपुरीमिव||

****

कारकम्

गद्यम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	08	13	00	-	21
अङ्का	08	13	00	-	21

प्रश्नानुगुणं प्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्का	आहत्य
1	वस्तुनिष्टः	08	08	08
2	अतिलघूत्तरम्	13	13	13
3	लघूत्तरम्	0	0	0
4	दीर्धोत्तरम्	0	0	0

स्तरः	प्रश्नाः	अङ्का
सुलभः	08	07
साधारणः	08	08
कठिनः	05	05
आहत्य	21	21

I.सूक्तं उत्तरं चित्वा लिखत | (स्म-सु)

1. **"**वृक्षात्**"** अत्र इदं कारकम् भवति।

A) अधिकरणकारकम् **B)** अपादानकारकम् **C)** करणकारकम् **D)** संप्रदानकारकम्

2." कर्मकारकम्**"** अत्र इयं विभक्तिः   ।

A) तृतीया **B)** पञ्चमी **C)** द्वितीया **D)** चतुर्थी

3. भाद्रपदमासे गणेशचतुर्थी महोत्सवः भवति

A) कर्तृ **B)** कर्म **C)** अधिकरणम् **D)** सम्प्रदानम्

4."चतुर्थी विभक्तेः**"** इदं कारकम् उच्यते।

A) अपादानम् **B)** अधिकरणम् **C)** कर्तृ **D)** सम्प्रदानम्।

5.अस्याः विभक्तेः कारकम् नास्ति।

A) प्रथमाविभक्तेः **B)** द्वितीया विभक्तेः **C)** सप्तमीविभक्तेः **D)** षष्ठीविभक्तेः

6."करणकारक**"**सम्बद्धं इदं वाक्यम् भवति।

A) नेत्रः चित्रं दृश्यते **B)** नेत्राय चित्रं दृश्यते **C)** नेत्राभ्यां चित्रं दृश्यते **D)** नेत्रं चित्रं दृश्यते

7. कारकाणां संख्या **I**

A) त्रीणि **B)** षट् **C)** सप्त **D)** पञ्च

8. माता पुत्र फलं यच्छति रेखाङ्कितपदसम्बद्धा कारकविभक्तिः इयं भवति

A) षष्ठी **B)** प्रथमा **C)** चतुर्थी **D)** पञ्चम

II. अधस्तनवाक्येषु विद्यमानानि कारकाणि लिखत ।(धा-क)

9.छात्रः पाठं पठति।

10.पुत्राय जनकः धनं ददाति ।

11.गृहे भोजनं खादामः ।

12.सा पत्रं लेखन्या लिखति ।

13.हस्तात् सुधाखण्डः पतति ।

14. रामेण वाली हतः।

15. रामं रमेशं भजे।

III. योजयत ।(स्/धा-सु/सा)

16.हस्तेन	सम्प्रदानम्
17.पादपात्	कर्म
18. रामाय	करणम्
19.शालायाम्	अपादानम्
20.सुरेशः	अधिकरणम्
21. पुस्तकं	कर्ता

****

अलङ्कारः

उद्दिष्टानुगुणं प्रामुख्यम्

अलङ्कारः	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	08	10	07	–	25
अङ्काः	08	10	14	–	32

प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	10	10
2	अतिलघूत्तरम्	08	08
3	लघूत्तरम्	07	14
4	दीर्घोत्तरम्	00	00

प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	05	05
साधारणः	15	17
कठिनः	05	10
आहत्य	25	32

I. सूक्तम् उत्तरं चित्वा क्रमाक्षरेण सह लिखत |(स्म-सु)

1. यत्र शब्दैः काव्यस्य सौन्दर्यं वर्धते तत्र अयमलङ्कारः ||

A) शब्दालङ्कारः **B)** अर्थालङ्कारः **C)** देहालङ्कारः **D)** मुखालङ्कारः

2. यत्र अर्थविशेषैः काव्यस्य सौन्दर्यं वर्धते तत्र अयमलङ्कारः |

A) शब्दालङ्कारः **B)** अर्थालङ्कारः **C)** देहालङ्कारः **D)** मुखालङ्कारः

3. **"**उपमानम्**,**उपमेयम्**,**उपमावाचकम्**,** गुणाः**"** अत्र समूहेतरपदम् इदं भवति |

A) उपमानम् **B)** उपमेयम् **C)** उपमावाचकम् **D)** गुणाः

4. अभेदः अस्मिन् अलङ्करे वर्ण्यते |

A) उपमालङ्कारः **B)** रूपकालङ्कारः **C)** श्लेशालङ्कारः **D)** अनन्वयालङ्कारः

5. **"**सर्वदोमाधवः पायात्**"** अत्र अयमलङ्कारः |

A) उपमालङ्कारः **B)** रूपकालङ्कारः **C)** श्लेशालङ्कारः **D)** अनन्वयालङ्कारः

6. यत्र एकमेव वस्तु उपमानं उपमेयं च भवति तत्र अयमलङ्कारः |

A) उपमालङ्कारः **B)** रूपकालङ्कारः **C)** श्लेशालङ्कारः **D)** अनन्वयालङ्कारः

II.एकवाक्येन उत्तरं लिखत | (स्म-सु)

7. अलङ्कारः नाम कः ?

8. अलङ्कारस्य भेदौ कौ ?

9. शब्दालङ्कारः नाम कः ?

10. अर्थालङ्कारः नाम कः ?

11. उपमालङ्कारे कति अंशाः भवन्ति ?

12. यत्र उपमानोपमेययोः मध्ये अभेदः वर्ण्यते तत्र कः अलङ्कारः ?

13. यत्र वाक्ये पदे वा अनेकार्थाः भासन्ते तत्र कः अलङ्कारः ?

14. यत्र एकमेव वस्तु उपमानम् उपमेयं च भवति   तत्र कः अलङ्कारः ?

III. चतुर्थपदं लिखत | (स्/धा-सु/सा)

15. उपमालङ्कारः – सादृश्यः :: रूपकालङ्कारः - ----------
16. श्लेशः – नानार्थसंश्रयः :: अनन्वयः - ------------
17. मुखं चन्द्रः इव सुन्दरम् – उपमालङ्कारः :: मुखचन्द्रः - ------------
18. सर्वदोमाधवः पायात् – श्लेषः :: रामरावणयोर्युद्धं रामरावणयोरिव - ----------------

IV. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत | (अ-क)

19. सोमदत्तः अभिमन्युः इव शूरः | (2023 March)

20. गगनं गगनाकारं सागरः सागरोपमः |

21. मुखारविन्दे विनिवेशयन्तम् |

22. कादम्बरीरसज्ञानां आहारोऽपि न रोचते |

23. तस्याः मुखं कमलमिव सुन्दरम् |

24. मुखचन्द्रः |

25. सैन्धवमानय |

****

|| अनुवादः ||

उद्दिष्टानुगुणं प्रामुख्यम्

अनुवादः	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	00	16	00	–	16
अङ्काः	00	32	00	–	32

प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	00	00
2	अतिलघूत्तरम्	00	00
3	लघूत्तरम्	16	32
4	दीर्घोत्तरम्	16	32

प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	00	00
साधारणः	08	16
कठिनः	08	16
आहत्य	16	32

I. कर्नाटक भाषया आङ्लभाषया वा अनुवादं कुरुत |(धा-सु)

1.पुरा भोजभूपालस्य सभायां अनेके कवयः आसन् | तेषामेकः कालिदासः नाम |

2.आसीत् द्रोणो नाम प्रथितः धनुर्वेदाचार्यः तस्य धनुरगवेदकौषलम् दृष्ट्वा भीष्मः तं स्वनगरं आनयत् |

3. गोदावरीनदीतीरे शाल्मलीतरुः आसीत् | तत्र अनेके पक्षिणः निवसन्तिः |

4. वयं प्रतिदिनं शालां गच्छामः | तत्र संस्कृतमपि पठामः |

5. कृषिकाः ग्रामे निवसन्ति | ते क्षेत्रेषु श्रमेण कार्यं कुर्वन्ति |

6. शिवपार्वत्योः पुत्रः गणेशः | कार्यारम्भे सर्वे गणेशं पूजयन्ति |

7 परश्वः शालायां वार्षिकोत्सवः भविष्यति | गण्याः अतिथयः आगमिश्यन्ति |

8. नारीकेलवृक्षः कल्पवृक्षः इति भूलोके जनाः भावयन्ति | अत्र वृक्षस्य सर्वे भागाः उपयोगाय भवन्ति |

II. संस्कृतेन अनुवादं कुरुत |(धा-क)

9. ಮಹಾಭಾರತದ ಭೀಷ್ಮಪರ್ವದಲ್ಲಿ ಭಗವದ್ಗೀತೆ ಇದೆ. ಇದನ್ನು ಶ್ರೀಕೃಷ್ಣ ನು ಅರ್ಜುನನಿಗೆ ಉಪದೇಶಿಸಿದನು.

10. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

11. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಭಾಷೆಯನ್ನು ಕಲಿಯುತ್ತಾರೆ.

12. ಇಂದು ರವಿವಾರ,ಶಾಲೆಗೆ ವಿರಾಮವಿದೆ. ನಾಳೆ ಸೋಮವಾರ ನಾವು ಶಾಲೆಗೆ ಹೋಗುವೆವು.

13. ಗಾಳಿಯು ಎಲ್ಲ ಕಡೆ ಇದೆ. ಗಾಳಿಯಿಲ್ಲದೆ ಪ್ರಾಣಿಗಳು ಬದುಕಲಾರವು.

14. ಆನೆಯು ಸಸ್ಯಹಾರಿ ಪ್ರಾಣಿ.ಅದು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತದೆ.

15. ಪಕ್ಷಿಗಳು ಗೂಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತದೆ. ಅವು ಆಕಾಶದಲ್ಲಿ ಹಾರುತ್ತವೆ.

16. ಭಾರತೀಯ ಪರಂಪರೆಯು ವಿಶಿಷ್ಟವಾಗಿದೆ. ಅದನ್ನು ಅನುಸರಿಸೋಣ.

****

PART – 2

सूक्तिपीयूषम्

उद्दिष्टानुगुणं प्रामुख्यम्

सूक्तिपीयूषम्	स्मरणम्	धारणम्	अभिव्यक्तिः	प्रशंसा	आहत्य
प्रश्नाः	20	30	9	–	59
अङ्काः	20	40	12	–	72

प्रश्नानुगुणप्रामुख्यम्

क्र.संख्या	प्रश्नानां स्वरूपम्	प्रश्नाः	अङ्काः
1	वस्तुनिष्ठः	08	08
2	अतिलघूत्तरम्	44	44
3	लघूत्तरम्	04	08
4	दीर्घोत्तरम्	03	12

प्रश्नस्तरः

स्तरः	प्रश्नाः	अङ्काः
सुलभः	12	12
साधारणः	30	30
कठिनः	17	30
आहत्य	59	72

I.सूक्तं उत्तरं चित्वा लिखत |(स्म-सु)

1.'पदपाः' अस्य समानार्थकपदं इदम् भवति।

A) हस्ताः **B)** पादाः **C)** वृक्षाः **D)** पाषाणाः

2.'क्षयः' अस्य विरुद्धार्थकपदं इदम् भवति।

A) सुक्षयः **B)** अक्षयः **C)** रक्षयः **D)** निरक्षयः

3.'तस्य' अत्र अन्यलिङ्गपदं इदम् भवति।

A) तस्या **B)** तस्यै **C)** तया **D)** तस्याः

4.'पर्वतीकृत्य ' एषः प्रत्ययः अस्ति।

A) ल्यप् **B)** क्त्वा **C)** तुमुन् **D)** तव्यत्

5.'शिक्षा <u>क्षयं</u> गच्छति ' अत्र रेखाङ्कितपदं इदं कारकम् भवति।

A) कर्मकारकम् **B)** करणकारकम् **C)** सम्प्रदानकारकम् **D)** अधिकरणकारकम्

6.'शुष्यति' अत्र एषः लकारः भवति।

A) लङ् **B)** लृट् **C)** लोट् **D)** लट्

7.निपतन्ति' अत्र इदं वचनम् भवति।

A) एकवचनम् **B)** द्विवचनम् **C)** बहुवचनम् **D)** त्रिवचनम्

8.यस्य' अत्र इयं विभक्तिः विद्यते

A) तृतीया **B)** सप्तमी **C)** पञ्चमी **D)** षष्ठी

II. एकवाक्येन उत्तरत । (स्म-सु)

9. अक्षयाः निधयः कति सन्ति ?

10. कालपर्ययात् का क्षयं गच्छति ?

